CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्राद्ध के पूर्व दिन नियम पूर्वक रहकर, श्राद्ध के दिन प्रातःकाल स्नान कर श्वेतवस्त्र पहिन कर स्वयं पाक बनावे अथवा स्त्री द्वारा बनवावे । पाक हो जाने पर रक्षा दीप जलावे । स्वयं पूर्व मुख बैठकर आचमन, प्राणायाम करके 'पवित्रे स्थो०' इस मन्त्र से पवित्री धारण करे । 'श्राद्धारम्भे०' इसको पढ़कर पीली सरसो

आ० १६१ सं०

[अथाऽपात्रकैकोद्दिष्टश्राद्धप्रयोगः] ततः पूर्वदिने कृतनियमः श्राद्धदिने प्रातर्वस्त्रयुग्मेन स्नात्वा शुक्लद्विवासाः श्राद्धदेशमागच्छेत् । तत्र स्वयं पाकं कुर्यात् । सपिण्डस्त्रीद्वारा वा पाचयेत् । अन्यकृते पाके सिद्धमिति स्पृष्ट्वा ॥ पाके वृत्ते रक्षादीपं निधाय ॥ प्राङ्मुखः आचम्य पवित्रधारणम् ॥ ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् । ततः प्राणायामं कुर्यात् । श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ॥ पितरं मनसा ध्यात्वा ततः श्राद्धं समारभेत् ॥ सर्षपविकरणम् ॥ नमो नमस्ते गोविन्द! पुराणपुरुषोत्तम! ॥ इदं श्राद्धं हृषीकेश! रक्ष त्वं सर्वतो दिशः ॥ ॐ प्राच्यै नमः ॥ ॐ अवाच्यै नमः ॥ ॐ प्रतीच्यै नमः ॥ ॐ उदीच्यै नमः ॥ ॐ अन्तरिक्षाय नमः ॥ ॐ भूम्यै नमः ॥ नीवीं बद्ध्वा ॥ यव-पुष्पैः श्राद्धभूम्यै नमः, इति त्रिः सम्पूज्य ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं

१६१

को चारो तरफ छिड़के । नीवीबन्धन कर हाथ में यव, पुष्प लेकर तीन बार पृथ्वी पर छिड़के । 'अपवित्रः०'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इससे श्राद्ध-सामग्री और शरीर पर जल छिड़के। हाथ में त्रिकुश जल लेकर 'अमुकगोत्रः०' इससे संकल्प करे। तीन बार गायत्री का जप करे। अपसव्य होकर दक्षिण मुख बाँये पैर को मोड़कर मोटक, तिल, जल लेकर

श्राद्धसामग्रीं च सम्प्रोक्ष्य ॥ ततः कुशत्रय-तिल-जलान्यादाय देशकालौ संकीर्त्य ॥ ॐअमुकगोत्रः अमुकशर्माऽहं अद्याऽमुकगोत्रस्य पितुः अमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहं करिष्ये, ततो गायत्रीं त्रिर्जपित्वा। ॐतत्सवितु०। ॐदेवताभ्यः पितृभ्यश्च महायोगीभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिर्जपेत् ॥ ततोऽपसव्यम् ॥ दक्षिणाभिमुखः पातितवामजानुर्मोटक-तिल-जलान्यादाय॥ ॐअद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे इदमासनं ते स्वधा ॥ इत्यासनमुत्सृजेत् ॥ ॐ अपहता ऽअसुरा रक्षाꣳसि वेदिषदः ॥ इति भोजनपात्रे तिलान् विकीर्य्य ॥ ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रवन्तु तेऽवन्त्वस्मान् ॥ इति पठित्वा ॥ ततोऽर्घकरणम् ॥ पुटकादौ दक्षिणाग्रं पवित्रं धृत्वा पवित्रे स्थेति ॥ ॐ शन्नो देवीरभिष्टये ऽआपो भवन्तु पीतये ॥ शꣳ योरभिस्रवन्तु नः ॥ इति जलं क्षिपेत् ॥ ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः

आसन का संकल्प करे। 'अपहता०' इससे भोजन पात्र पर तिल छिड़के। 'आयन्तु न०' से आवाहन करे। दोनिये में दक्षिणाग्र पवित्रो रखे। 'शन्नो देवी०' से जल भरे। 'तिलोऽसि०' से तिल छोड़े और गन्ध, पुष्प छोड़-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर अर्घपात्र को बाँये हाथ पर रख कर दक्षिण हाथ से भोजन पात्र पर पवित्री को उत्तराग्र रखे, उसपर
श्रा० पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा ॥ इति पुटके तिलान् क्षिपेत् ॥ गन्ध-पुष्पे तूष्णीं सं०
१६१ क्षिपेत् । अर्घपात्रं वामहस्ते कृत्वा भोजनपात्रे पवित्रमुत्तराग्रं धृत्वा ॥ तदुपरि उदकान्तरं दत्वा ॥
दक्षिणहस्तेनाऽच्छाद्य ॐ या दिव्या ऽआपः पयसा सम्बभूवुर्या ऽअन्तरिक्षा ऽउत पार्थिवीर्याः ॥
हिरण्यवर्णा यज्ञियास्ता न ऽआपः शिवाः सꣳ स्योना सुहवा भवन्तु ॥ इति पठित्वा मोटका-
दीन्यादाय ॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे इदं हस्ताघ्यं ते
स्वधा ॥ इति पवित्रोपरि अर्घजलं दददुत्सृजेत् ॥ पवित्रयुतमर्घपात्रमासनवामपार्श्वे 'पित्रे
स्थानमसि' इति न्युब्जीकुर्यात् ॥ ततो मोटकरूपासनोपरि गन्धादि दद्यात् ॥ ततो मोटक-तिल-
जलान्यादाय ॥ ॐअद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतानि गन्ध-पुष्प-धूप-
दीप-ताम्बूल-यज्ञोपवीतवासांसि ते स्वधा ॥ ततो जलेन भोजनपात्रासनयोश्चतुर्दिशं मण्डलं
कुर्यात् ॥ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ॥ एवं मण्डलतोयं तु सर्वभूतानि रक्षतु ॥
ततो भूस्वामिनेऽन्नदानम् ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः ॥ ततो भोजनपात्रे अन्नं पक्वान्नं १६२

त्रिकुश से जल छिड़के । दाहिने हाथ से अर्घपात्र को ढँक कर 'या दिव्या०' इसको पढ़कर संकल्प करे । मोटक
रूप आसन पर गन्धादि चढ़ावे । उसका संकल्प करे । फिर हाथ में जल लेकर 'यथा चक्रा० 'इसको पढ़कर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भोजनपात्र तथा आसन का मण्डल करे। 'इदमन्नं' इससे भूस्वामी के लिये अन्न देवे। भोजन पात्र के ऊपर अन्न, पक्वान्न, इत्यादि पुरुषाहार के बराबर परिवेषण कर दोनिये में जल, घृत रखकर अन्न के ऊपर दोनों हाथ से 'मधु व्वाता०' इस मंत्र को पढ़ता हुआ मधु गिरावे। दोनों हाथ से भोजन पात्र का स्पर्श कर 'पृथ्वी

शाकं गुडं वा परिवेषयेत्॥ ततः पुरुषाहारक्षमभन्नं परिविष्य पुटके जलं घृतं चोपनीय अन्नोपरि हस्तद्वयेन मधु दत्वा॥ ॐ मधु व्वाता ऽऋतायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्न्नः सन्त्वोषधीः॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता॥ मधुमान्नो व्वनस्पतिर्म्मधुमाँ२ऽअस्तु सूर्य्यः माध्वीर्गावो भवन्तु नः। मधु मधु मध्वेति च जपेत्॥ व्यस्ताभ्यां हस्ताभ्यां पात्रमालभेत्॥ ॐपृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे ऽअमृते ऽअमृतं जुहोमि स्वाहा॥ ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य पाꣳसुरे स्वाहा॥ ॐ कृष्ण कव्यमिदं रक्ष मदीयम्॥ वामेन पात्रमत्यजन् दक्षिणाङ्गुष्ठम्॥ ॐ इदमन्नम्॥ ॐ इमा आपः॥ ॐ इदमाज्यम्॥ ॐ इदं कव्यमिति निक्षिपेत्॥ अपहता ऽअसुरा रक्षाꣳसि व्वेदिषदः॥ इत्यन्नोपरि प्रचुर-तिलान् प्रक्षिपेत्॥ मोटकादीन्यादाय॥ ॐ अद्यामुकगोत्र

ते०' 'इदं विष्णु०' इसको पढ़े। दाहिने हाथ के अगूँठे से अन्न का, जल का, घृत का, पुनः अन्न का क्रम से स्पर्श करे। 'अपहता०' इस मन्त्र से अन्न के ऊपर तिल छिड़के 'अद्यामुकगोत्र०' इससे संकल्प करे। 'अन्नहीनं'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पढ़कर तीन बार गायत्री का जप करे। कुशे के ऊपर बैठ कर 'मधु व्वाता०, कृणुष्वपाज०' इत्यादि सूक्तों का

पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतत्तेऽन्नं सोपकरणं स्वधा ॥ ततो वामहस्तोद्धृत्य ॥ ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वमच्छिद्रमस्तु ॥ ततो गायत्रीं त्रिर्जपेत् ॥ ॐ तत्सवितु० ॥ कुशेषूपविश्य ॥ ॐ मधु व्वाता इति तृचं जपेत् ॥ कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ२ऽ॥ इभेन ॥ तृष्वीमनु प्रसितिन्द्रूणानोस्तासि विद्धर्यं रक्षसस्तपिष्टैः ॥१॥ तवं भ्रमास ऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानं ॥ तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वंगुल्काः ॥२॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो ऽअस्या ऽअदब्धः ॥ यो नो दूरे ऽअघशंसो यो ऽअन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥३॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२ऽ॥ ओषतात्तिग्महेते ॥ यो नो ऽअरातिः समिधान चक्रे नीचा तं धक्ष्यतसन्न शुष्कम् ॥४॥ ऊर्द्ध्वो भव प्रतिविद्ध्याद्धि अस्मदाविष्कृणुष्व दैव्यान्यग्ने ॥ अव स्थिरा तनुहि यातुजूनाम्मामिमजामिम्प्रमृणीहि शत्रून् ॥५॥ इति रक्षोघ्नीर्ऋचो जपित्वा भूमौ तिलान् विकीर्य्य पितरं ध्यात्वा मन्त्रं पठेत् ॥ ॐ उदीरतामवर ऽउत्परास ऽउन्मध्यमाः पितरः सोम्यासः ॥ असुं य ऽईयुरवृका ऋत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाठ करे। तदनन्तर भूमि पर दक्षिणाग्र तीन कुशे को बिछावे। उसके ऊपर त्रिकुश से जल छिड़के। घृत, तिल, जल मिले हुए अन्न को हाथ में लेकर 'अनग्निदग्धा०' इस मंत्र को पढ़ता हुआ कुशे पर अन्न को रख दे। पुनः सव्य हो आचमन करे। ३ बार गायत्री का जप, 'मधु व्वाता' का पाठ करे। पुनः अपसव्य होकर एक हाथ की चतुर-ज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ इति पितृमन्त्रम् ॥ ॐ सहस्रशीर्षा०, इत्यादि पुरुषसूक्तम् ॥ ॐ आशुः शिशान०, इत्यादिकमप्रतिरथं च पठेत् ॥ ॐ नमस्तुभ्यं विरूपाक्ष ! नमस्तेऽनेक-चक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठित्वा ॥ उच्छिष्टसमीपे दक्षिणाग्रं कुशत्रयमास्तीर्य्य जलेन सिक्त्वा किञ्चिदन्नं सघृत-तिल-जलसिक्तमादाय ॥ ॐ अनग्नि-दग्धाश्च ये जीवा ये प्रदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति कुशोपरि अन्नं विकिरेत् ॥ ततः सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वा ॥ गायत्रीं मधु व्वाता इत्यादिकं मधु मधु मधिवति च जपेत् ॥ ततोऽपसव्यं कृत्वा हस्तमात्रं चतुरंगुलोच्छ्रितं दक्षि-णप्लवं पिण्डिकायां हस्तद्वयेन दर्भपिञ्जल्या दक्षिणाग्रां रेखां कुर्यात् ॥ ॐअपहता ऽअसुरा रक्षा-

स्रवेदी चार अङ्गुल ऊँची दक्षिण तरफ जरा नीची वेदी बनावे। 'अपहता०' इस मन्त्र से कुशे से दक्षिणाग्र एक १६६

---

१ तथा च स्मृतिः ॥ आभ्युदयिके च पूर्वे क्षयाहे अग्निमेव च ॥ नैर्ऋत्ये पार्वणश्राद्धे प्रेताश्राद्धे तु दक्षिणे ॥ इति विकरदानस्थानम् ॥ सामगानाम् ॥ अग्निपाठ, अनग्निपाठस्तु यजुर्विदाम् ॥ पवित्रादीनां त्यागः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रेखा करे। उस कुशे को उत्तर तरफ फेंक दे। 'ये रूपाणि०' इस मन्त्र से रेखा के ऊपर अङ्गार घुमावे। उस
अ।० अङ्गार को दक्षिण दिशा में फेंक दे। कटे हुए मूल वाले तीन कुशे को रेखा पर बिछावे। सव्य होकर 'देवताभ्यः' सं०
१६० ँसि व्वेदिषद॰ ॥ इति दर्भपिञ्जुलीमुत्तरस्यां दिशि क्षिपेत् ॥ ॐ ये रूपाणि प्रतिमुञ्चमानाः
ऽअसुराः सन्त॰ स्वधया चरन्ति ॥ परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ इति
रेखोपरि अङ्गारं भ्रामयित्वा ॥ अङ्गारं दक्षिणतः त्यजेत् । ततो रेखोपरि छिन्नमूलकुशत्रयमास्तीर्य ॥
सव्यं कृत्वा ॥ ॐ देवताभ्यः, इति त्रिर्जपेत् ॥ ततोऽपसव्यम् ॥ तिल-जल-गन्ध-पुष्पाणि
पुटके कृत्वा ॥ पुटकं वामहस्ते धृत्वा दक्षिणहस्ते मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्र
पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डस्थानेऽत्रावने निक्त्र ते स्वधा ॥ इति छिन्नमूल-
कुशोपरि अवनेजनं दद्यात् ॥ किञ्चिज्जलं पुटकेऽवशेषयेत् ॥ तिल-शर्करा-मधु व्यञ्जनादिघृत-
मिश्रैरन्नैः पिण्डं बिल्वोपमं निर्माय मधुघृताभ्यामभिघार्य्य ॥ मोटक-तिल-जलसहितमादाय ॥
ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एष ते पिण्डः स्वधा ॥ इत्यवने- १६७

इसको ३ बार पढ़े। पुन. अपसव्य होकर दोनिये में गन्ध, पुष्प, तिल, जल छोड़कर अवनेजन का संकल्प करे।
तिल, शर्करादि युक्त अन्न को लेकर बिल्व के समान पिण्ड को बनाकर उसमें मधु, घृत लगाकर हाथ में मोटक,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिल, जल को लेकर 'अद्यामुकगोत्र०' इससे पिण्डदान का संकल्प करे। इसके बाद कुशा के मूल में हाथ को पोंछे। सव्य होकर आचमन करे। पुनः अपसव्य होकर 'अत्र पितर०' इस मन्त्र से श्वाँस खींचे। पुनः दक्षिणा-

जनस्थाने पिण्डं दद्यात् ॥ ततः कुशमूले तूष्णीं करं प्रोक्ष्य ॥ सव्यं कृत्वाऽऽचामेत् ॥ हरिं स्मृत्वा ॥ अपसव्यम् ॥ दक्षिणाभिमुखः ॥ अत्र पितर्मादयस्व यथाभागमावृषायस्वेति पठित्वा ॥ उत्तराभिमुखीभूय श्वासं नियम्य पितरं ध्यायन् ॥ पुनर्दक्षिणाभिमुखो भवन् ॥ ॐ अमी मदन्त पितर्यथाभागमावृषायिष्ट ॥ इति पठेत् ॥ ततः प्रत्यवनेजनजलपात्रमादाय॥ ॐ अद्यामुकगोत्र पितस्मुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे पिण्डेऽत्र प्रत्यवने निक्त्र ते स्वधा ॥ इति पिण्डोपरि प्रत्यवनेजनं दद्यात्। ततो नीवीं विस्रंस्य। सव्येनाऽऽचम्य। अपसव्यं कृत्वा। वामेन पाणिना सूत्रमादाय दक्षिणकरेण धृत्वा ॥ ॐ नमस्ते पिता रसाय नमस्ते पितः शोषाय नमस्ते पितर्जीवाय नमस्ते पितः स्वधायै नमस्ते पितर्घोराय नमस्ते पितर्मन्यवे नमस्ते पितः पितर्नमस्ते

भिमुख होकर 'अमी मदन्त०' इससे श्वाँस छोड़े। पुनः प्रत्यवनेजन पात्र को हाथ में लेकर पिण्ड के ऊपर जल छोड़े। नीवी को खोलकर सव्य हो आचमन करे। पुनः अपसव्य होकर 'नमस्ते पिता०' इससे पिण्डे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पर सूत्र चढ़ावे । हाथ में मोटकादि लेकर सूत्र का संकल्प करे। पितर का ध्यान करता हुआ पिण्डे पर गन्ध, पुष्पादि से पूजन करे । पिण्ड शेषान्न को पिण्ड के पास रखे । भोजन पात्र पर 'शिवा आपः०' इससे जल छोड़े,

आ० १६६ गुहान्नः पितर्देहि सतस्ते पितर्देष्मं ॥ इति पठित्वा ॐ एतत्ते पितर्वास, इति पिण्डोपरि सूत्रं दद्यात् ॥ ततो मोटक-तिल-जलान्यादाय ॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डे एतत्ते वासः स्वधा, इति सूत्रमुत्सृजेत्॥ ततः पितरमुद्दिश्य पिण्डे तूष्णीं गन्ध-पुष्प-धूप-दीप-ताम्बूलानि दद्यात् । पिण्डशेषान्न पिण्डसमीपे विकिरेत्॥ ततः भोजनपात्रे ॥ ॐ शिवा आपः सन्तु । इति जलम् ॥ ॐ सौमनस्यमस्तु । इति पुष्पम् ॥ ॐ अक्षतं चारिष्टं चास्तु। इत्यक्षतान् ॥ ततो मोटक-तिल-जलान्यादाय ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकं दद्यात् ॥ ततः सव्यं कृत्वा दक्षिणाभिमुखः ॐ अघोरः पिताऽस्तु इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात्॥ ततः पूर्वाभिमुखः कृताञ्जलिः सुमनाः ॥ ॐ गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्द्धन्तां वेदाः १५ सन्ततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्तु ॥ अन्नं च नो बहु भवेदतिथींश्च १६६

'सौमनस्य०' इससे पुष्प, 'अक्षतं०' इससे चावल । पुनः मोटकादि लेकर 'अद्यामुकगोत्रस्य०' इससे अक्षय्योदक का संकल्प करे । पुनः सव्य होकर 'अघोरः पिताऽस्तु' इससे पूर्वाग्र पिण्ड के ऊपर जलधारा दे । पूर्वमुख होकर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'गोत्रन्नो०' इसका पाठ करे । पुनः अपसव्य होकर पवित्री के सहित कुशे को पिण्डपर दक्षिणाग्र रखकर 'ऊर्ज्जं वहन्ती०' इससे दुग्ध या जल की धारा दे । नम्र होकर पिण्ड को सूँघकर उठावे । पिण्ड के नीचे के कुशे को

भा० १७० सं०

लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन । एताः सत्याः आशिषः सन्तु । इत्याशीः प्रार्थनां कृत्वा ॥ अपसव्यं कृत्वा ॥ सपवित्रकुशत्रयं दक्षिणाग्रं पिण्डोपरि धृत्वा ॥ ऊर्ज्जं व्वहन्तीरमृतङ्घृतम्पय÷ कीलालम्परिस्रुतम् ॥ स्वधास्थ तर्प्पयत मे पितॄन् ॥ इति मन्त्रेण कुशोपरि दक्षिणाग्रां जलधारां दद्यात् ॥ ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत् ॥ अर्घपात्रमुत्तानीकृत्य दक्षिणां दद्यात् ॥ ततो मोटकादीन्यादाय दक्षिणाद्रव्यं चाऽऽदाय ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। इति दद्यात् ॥ अभिरम्यतामिति विसर्जनम् ॥ ततः सव्यम् ॥ ॐ देवताभ्यः, इति त्रिर्जपेत् ततोऽपस

१७०

और उल्मुक को अग्नि में छोड़ दे । अर्घपात्र को सीधा कर दे । पुनः हाथ में मोटक, तिल, जल लेकर दक्षिणा दान का संकल्प करे । 'अभिरम्यताम्' इससे विसर्जन करे । पुनः सव्य होकर 'देवताभ्यः०' इस को ३ बार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पढ़े। पुनः अपसव्य होकर दीपक बुझावे। इसके बाद हाथ-पैर धोकर सव्य हो आचमन करे। 'प्रमादात्०'

व्यम्॥ पाणिभ्यां दीपं निर्वापयेत्॥ ततो हस्तौ पादौ च प्रक्षाल्य॥ सव्यमाचम्य॥ प्रमादादिति पठित्वा विष्णुं स्मरेत्॥

इति श्रीवायुनन्दनशर्मसङ्गृहीता पित्रैकोद्दिष्टश्राद्धपद्धतिः समाप्ता॥

इसको पढ़े, विष्णु का ध्यान करे।

तत्तनूजेन पण्डित श्रीअग्निनारायणमिश्रेण विरचिता हिन्दीटीकासहिता
पित्रैकोद्दिष्टश्राद्धपद्धतिः समाप्ता।

—:: ❀ ::—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पार्वणश्राद्ध--[अनुक्रमणिका] अपने ऊपर जल छिड़कना, प्रतिज्ञा संकल्प, गायत्री जप, आसन, आवाहन, अर्घ, गन्धादि पूजन, मण्डल, आहुति, भूस्वामि के लिये अन्न दान, परिवेषण, मधु छोड़ना, पात्रालम्भन, अन्नदान, अन्नहीनं, गायत्री, 'मधुव्वाता' का जप। वेदी का निर्माण, इसके बाद रेखाकरण, उल्मुकभ्रामण, कुशास्तरण,

[अथाऽपात्रकपार्वणश्राद्धप्रयोगः] तत्रादावनुक्रमणिका ॥ सेकः प्रतिज्ञा गायत्री देवताभ्यस्तथाऽऽसनम् ॥ आवाहनाऽर्घदानानि गन्धादीनां समर्पणम् ॥ १ ॥ मण्डलान्याहुती द्वे चाप्यन्नं भूस्वामिने तथा ॥ परिवेषो मधूत्सर्गो पात्रालम्भोऽन्नदानकम् ॥ २ ॥ अन्नहीनं च गायत्री मधुव्वातां ततो जपेत् ॥ विकराऽऽचमनञ्चाथ गायत्री मधुव्वातेति च ॥ ३ ॥ वेदिकां च ततः कुर्यात्तत्रोल्लेखनकं तथा ॥ उल्मुकभ्रामणं चाऽथ रेखयोः कुशधारणम् ॥४॥ देवताभ्यस्तथा पिण्डस्थाने तत्राऽवनेजनम् ॥ पिण्डदानमुपस्पर्शो द्विःश्वासयमनं तथा ॥५॥ पिण्डोपरि प्रत्यवनेजनं नीव्याश्च विस्रंसनम् ॥ सूत्रदानं पिण्डपूजा जल-पुष्पाऽक्षतान् क्षिपेत् ॥६॥ अक्षय्यवादो वार्धारा गोत्राशीः प्रार्थनं ततः ॥ पितृप्रीणनमाघ्राणं पिण्डोत्थापनकं तथा ॥७॥ चालनं चाऽर्घपात्राणां दक्षिणां च विसर्जनम् ॥ देवताभ्यो जपो रक्षादीपनिर्वापनं ततः ॥८॥

पुनः 'देवताभ्यः०' का जप, पिण्डस्थान पर अवनेजन, पिण्डदान, उपस्पर्श, श्वास नियमन, पिण्डे पर प्रत्यवनेजन, तत्पश्चात् नीवी विस्रंसन, सूत्रदान, पिण्डपूजन, भोजनपात्र पर जल, पुष्प, अक्षत का छोड़ना, अक्षय्योदक दान,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलधारा 'गोत्रन्नो' का पाठ, नम्र होकर पिण्डे को सूँघना और उठाना, देवार्घपात्र का संचालन, दक्षिणादान तथा विसर्जन, 'देवताभ्यः०' का जप, रक्षादीप निर्वापन, पुनः आचमन, 'प्रमादात्०' का पाठ। यह पार्वण श्राद्ध का अनुक्रम पण्डितों ने कहा है।

आ० सं०

आचम्य च ततो ब्रूयात् प्रमादात् कुर्वतामिति ॥ एष पार्वणश्राद्धस्याऽनुक्रमः कथितो बुधैः ॥९॥ इत्यनुक्रमः॥ [अथ प्रयोगः] अपराह्णे स्नातः शुक्लद्विवासाः शुचिराचम्य श्राद्धदेशमागच्छेत् ॥ ततः प्राङ्मुख उपविश्य ॥ अपवित्रः पवित्रो सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इति कुशत्रयानीतजलैरात्मानं श्राद्धवस्तूनि च सिञ्चेत् ॥ रक्षादीपं निधाय गौरसर्षपैरवकीर्य्य ॥ ॐ नमो नमस्ते गोविन्द ! पुराणपुरुषोत्तम ! ॥ इदं श्राद्धं हृषीकेश! रक्ष त्वं सर्वतो दिशः ॥ ॐ प्राच्यै नमः ॥ ॐ अवाच्यै नमः ॥ ॐ प्रतीच्यै नमः ॥ ॐ उदीच्यै नमः ॥ ॐ अन्तरिक्षाय नमः ॥ ॐ भूम्यै नमः ॥ नीवीबन्धनम्॥ नीवीवासोदशांशेन स्वरक्षार्थं प्रबन्धयेत् ॥ दक्षिणे कटिदेशे तु कुशत्रयतिलैः सह ॥ इति मन्त्रेण

१७२ १७३

[अथ प्रयोगः] अपराह्ण में स्नान कर शुक्ल (सफेद) वस्त्र पहन कर, पवित्र होकर आचमन कर श्राद्ध देश में आकर पूर्व मुख बैठकर 'अपवित्रः०' इस मन्त्र से त्रिकुश से अपने ऊपर तथा श्राद्ध-सामग्री पर जल छिड़के। रक्षदीप जलाकर बाँये हाथ में सरसों रख कर 'नमो नमस्ते०' इस मन्त्र को पढ़ता हुआ दाहिने हाथ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

से अपने चारो ओर सरसों छिड़के। इसके बाद दक्षिण कमर में त्रिकुश, तिल, खोसें। यव, पुष्प लेकर तीन बार पृथ्वी पर छोड़े, दोनों पैर के नीचे त्रिकुश रखकर त्रिकुश, तिल, जल हाथ में लेकर प्रतिज्ञा संकल्प करे।

दक्षिणकट्यां नीवीबन्धनम्॥ यव-पुष्पैः ॐ श्राद्धभूम्यै नमः॥ इति त्रिः सम्पूज्य पादयोरधः कुशत्रयं दत्वा कुशत्रय-तिल-जलैः सङ्कल्पं कुर्यात्॥ ॐ अद्यामुकमासे अमुकपक्षे अमुकतिथावमुकवासरे अमुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां अमुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकाऽमुकशर्मणाम् अपात्रकपार्वणश्राद्धमहं करिष्ये॥ ततो ॐ तत्सवितु० गायत्रीं त्रिर्जपित्वा॥ ॐ देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥ इति त्रिजपेत्॥ ततश्चोत्तराभिमुखो भूत्वा॥ दक्षिणोत्तरक्रमासादितकुशत्रयात्मकासनयोः प्रथमं दक्षिणमासनं सयवजलमुत्सृजेत्॥ ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनो विश्वे-

तदनन्तर तीन बार गायत्री का जप करे। इसके बाद, विश्वेदेव' के पास आकर उत्तर मुख बैठकर दक्षिणोत्तर क्रम से आसादित आसन के प्रथम आसन पर हाथ में त्रिकुश, यव, जल लेकर 'अद्यामुकगोत्राणां' पढ़कर १७४

टि०—निहन्मि सर्वं यदाऽग्कृद्भवेद्धताश्च सर्वे सुरदानवा मया॥ यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे। इति मन्त्रेण दक्षिणकट्यां तिलैः सह कुशत्रयेण नीवीबन्धनम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसन का संकल्प करे। उसी प्रकार द्वितीय आसन पर भी संकल्प करे। अपसव्य होकर बाँये पैर को मोड़ कर दक्षिणाभिमुख हो हाथ में त्रिकुश, तिल लेकर पूर्व-पश्चिम आसादित ६ आसनों के ऊपर पहिले पश्चिम के

देवा इदमासनं वो नमः इत्युत्सृजेत् ॥ एवम् ॐ अद्यामुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनो विश्वेदेवा इदमासनं वो नमः, इत्यपरमुत्सृजेत् ॥ ततोऽपसव्यम् ॥ पातितवामजानुर्दक्षिणाभिमुखो द्विगुणभुग्नकुशत्रय-तिल-जलान्यादाय ॥ पूर्वपश्चिमासादितलोटकरूपाणि षडासनानि तिल-जलप्रोक्षितानि प्रत्येकं पित्रादिभ्यः पश्चिमत आरभ्य उत्सृजेत् ॥ तत्र क्रमः ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः पार्वणश्राद्धे इदमासनं ते स्वधा ॥ एवं पितामह-प्रपितामहयोः ॥ ॐ अद्यामुकगोत्रस्य मातामहाऽमुकशर्मणः पार्वणश्राद्ध इदमासनं ते स्वधा ॥ एवं प्रमातामह-वृद्धप्रमातामहयोर्दद्यात् ॥ ततः सव्यम् ॥ ॐ विश्वान् देवानहमावाहयिष्ये इत्युक्त्वा ॐ विश्वेदेवास ऽआगत शृणुता इम ं मऽ हवम् ॥ एदं बर्हिर्निषीदत ॥ इत्यादिना देवानावाह्य ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः ॥ इति भोजनपात्रे यवान् विकीर्य्य ॥ ॐ विश्वेदेवाः शृणुतेमऽ हवम्मे ये

आसन पर सङ्कल्प का जल छोड़े, उसी क्रम से 'ॐ अद्यामुकगोत्रस्य०' से सभी आसनों पर मोटक रूप आसन का संकल्प करे। सव्य होकर 'ॐ विश्वान्०' इसको कहकर 'विश्वेदेवा०' इससे विश्वेदेव का आवाहन करे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'यवोऽसि०' इस मन्त्र से भोजनपात्र पर यव छिड़के। 'विश्वेदेवाः०, आगच्छन्तु' इन दोनों को पढ़े। पुनः अप-
श्रा० सव्य होकर 'उशन्तस्त्वा०' इस मन्त्र से पितरों का आवाहन करे। 'अपहता०' इस मन्त्र से भोजनपात्र पर तिल सं०
१७६ ऽअन्तरिक्षे ष ऽउप श्रविष्ट ॥ ये ऽअग्निजिह्वा ऽउत वा यजत्रा ऽआसद्यास्मिन्वर्हिषि माद-
दयद्ध्वम् ॥ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे साव-
धाना भवन्तु ते ॥ इति पठेत् ॥ ततोऽपसव्यम् ॥ पातितवामजानुः दक्षिणाभिमुखो पितृन-
हमावाहयिष्ये, इत्युक्त्वा ॐ उशन्तस्त्वा निधीमह्यशन्तः समिधीमहि ॥ उशन्नुशत ऽआवह
पितॄन्हविषे ऽअत्तवे ॥ इति पितृनावाह्य ॥ ॐ अपहता ऽअसुरा रक्षाँसि वेदिषद+ ॥
इति पात्रेषु तिलान् विकीर्य ॥ ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देव-
यानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥ इति पठेत् ॥ ततः सव्यम् ॥
देवार्घपात्राद्वये पूर्वाग्रं पवित्रे धृत्वा ॥ ॐ पवित्रेस्थेति ॥ ॐ शन्नो देवीरभिष्टय ऽआपो
भवन्तु पीतये ॥ शं योरभिस्रवन्तु नः ॥ इति जलं प्रक्षिप्य ॥ ॐ यवोसि यवयास्मद्-
द्वेषो यवयारातीः ॥ इति यवान् प्रक्षिप्य ॥ गन्ध-पुष्पे तूष्णीं क्षिपेत् ॥ अपसव्यम् ॥ पित्राद्य- १७६
छिड़के। 'आयन्तु नः०' इस मन्त्र को पढ़े। सव्य होकर देवता के अर्घपात्र में 'पवित्रे स्थो०' इस मन्त्र से पूर्वाग्र
पवित्री रखे। 'शन्नो देवी०' इस मन्त्र से जल भरे। 'यवोऽसि०' से यव छिड़के और गन्ध, पुष्प छोड़े। अप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सव्य होकर पित्रादि के अर्घपात्र में 'पवित्रे स्थो०' इस मन्त्र से दक्षिणाग्र पवित्री रखे। 'शन्नो देवी' से जल भरे। 'तिलोऽसि०' से तिल छोड़े। मौन होकर गन्ध, पुष्प छोड़े। सव्य होकर देवता के अर्घपात्र को बायें हाथ

र्घपात्रेषु प्रत्येकं दक्षिणाग्रपवित्रां धृत्वा ॥ ॐ पवित्रे स्थो व्वैष्णव्यौ सवितुर्व्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ ॐ शन्नो देवीरिति जलम् ॥ ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः प्रक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा ॥ इति तिलान् प्रक्षिपेत् ॥ गन्ध-पुष्पे तूष्णीं प्रक्षिपेत् ॥ ततः सव्यम् ॥ देवार्घपात्रं वामहस्ते कृत्वा तत्र स्थितं पवित्रं भोजन-पात्रे पूर्वाग्रं धृत्वा ॥ तदुपरि किञ्चिदुदकान्तरं दत्वा दक्षिणहस्तेनार्घपात्रमाच्छाद्य ॥ ॐ या दिव्या ऽआपः पयसा सम्बभूवुर्या ऽअन्तरिक्षा ऽउत पार्थिवीर्याः ॥ हिरण्यवर्णा यज्ञियास्ता न ऽआपः शिवाः शꣳ स्योना सुहवा भवन्तु, इति पठित्वा, यव-कुश-जलान्यादाय ॥ ॐ अद्या-मुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनो विश्वेदेवा एष वो हस्तार्घं नमः ॥ इति उत्सृजेत् ॥ एवं मातामहादिदेवेभ्योऽपि दद्यात् ॥ ततोऽपसव्यम् ॥

पर रखे, दक्षिण हाथ से पवित्री को उठाकर, भोजनपात्र पर पूर्वाग्र रखे। उस पर थोड़ा छिड़क कर दक्षिण हाथ से अर्घपात्र को ढाँके। 'या दिव्या०' इस मन्त्र को पढ़कर हाथ में त्रिकुश, यव, जल लेकर संकल्प करे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पितृर्घपात्रं वामहस्ते कृत्वा पितृभोजनपात्रे उत्तराग्रं पवित्रं धृत्वा तदुपरि किञ्चिदुदकान्तरंदत्त्वा ॥ दक्षिणहस्तेनाऽऽच्छाद्य ॥ 'ॐया दिव्ये'ति पठित्वा मोटक-तिल-जलान्यादाय ॥ ॐ अद्यामुकगोत्र पितरमुकशमन् पार्वणश्राद्धे एष ते हस्तार्घः स्वधा ॥ एवमेव पितामहादिपञ्चभ्योऽपि दद्यात् ॥ ततः सव्यम् ॥ पवित्रसहितमवशिष्टजलयुतं देवार्घपात्रद्वयं यथाक्रमं प्रत्येकं देवासनदक्षिणपार्श्वे ॐ विश्वेभ्यो देवेभ्यः स्थानमसि इत्युक्त्वा उत्तानमेव धारयेत् ॥ अपसव्यं कृत्वा (अर्घमेलनम्) किञ्चित् प्रपितामहार्घपात्रास्थितपवित्रादीनि पितामहार्घपात्रे कृत्वा तानि सर्वाणि पित्रर्घपात्रे कृत्वा ॥ पित्रार्घपात्रं पितामहार्घपात्रोपरि तदुभयं प्रपितामहार्घपात्रोपरि धृत्वा पितृवामपार्श्वे ॐ पितृभ्यः स्थानमसि, इति मिलितान्येव न्युब्जीकुर्यात् ॥ एवमेव मातामहार्घपात्राणि मेलयित्वा ॐ मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः स्थानमसि, इति मातामहवामपार्श्वे

पुनः अपसव्य होकर पित्रादि अर्घपात्र को भी क्रम से प्रत्येक को लेकर सङ्कल्प करे। सव्य होकर पवित्री के सहित देवता के अर्घपात्र को यथाक्रम से देवता के आसन के दक्षिण भाग में सीधा रख दे। इसके बाद अर्घ-

मेलन करे। प्रपितामह के अर्घपात्र में स्थित पवित्रादि को पितामह के अर्घपात्र में रख कर दोनों को पिता के अर्घपात्र में रखे। पिता के अर्घपात्र को लेकर पितामह के अर्घपात्र पर रखे, उन दोनों को प्रपितामह पर रख कर पिता के बाँयें भाग में तीनों को उलटा करके स्थापित करे। इसी प्रकार मातामह के अर्घपात्रों का भी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेलन करे। सव्य होकर देवता का गन्धादि से पूजन करे। हाथ में त्रिकुश, यव, जल लेकर 'अद्यामुकगो-
मिलितान्येव न्युब्जीकुर्यात्॥ ततः सव्यम्॥ गन्धादि दत्त्वा॥ यवकुशजलान्यादाय॥ ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनो विश्वेदेवाः एतानि गन्ध-पुष्प-धूप-दीप-ताम्बूल-यज्ञोपवीत-वासांसि वो नमः॥ एवं मातामहादिदेवेभ्योऽपि दद्यात्॥ ततोऽपसव्यम्॥ ततः पित्रादिभ्योऽपि गन्धादि दत्त्वा॥ मोटक-तिल-जलान्यादाय॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन्! पार्वणश्राद्धे एतानि गन्ध-पुष्प-धूप-दीप-ताम्बूल-यज्ञोपवीत-वासांसि ते स्वधा॥ एवमेव पितामहादिपञ्चभ्योऽपि दद्यात्॥ ततः सव्यम्॥ जलेन देवभोजनपात्राऽऽसनयोः चतुर्दिशं चतुष्कोणं मण्डलं कुर्यात्॥ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति॥ एवं मण्डलतोयं तु सर्वभूतानि रक्षतु॥ ततोऽपसव्येन पित्रादिपात्रासनेषु मण्डलानि कुर्यात्॥ ततः सव्यम्। प्राङ्मुखः श्राद्धदेयान्नाग्रभागमानीय स-घृतं

त्राणां०' से संकल्प करे। अपसव्य होकर पित्रादि का पूजन करे। मोटक, तिल, जल लेकर संकल्प करे। पुनः सव्य होकर जल से देवता के भोजन पात्र तथा आसन का 'यथा चक्रायुधो०' से मण्डल करे। अपसव्य होकर

टि०—१ अनामिक्या च देवस्य ऋषीणां वै तथैव च॥ गन्धानुलेपनं कार्यं प्रयत्नेन विशेषतः॥ पितृणामर्पयेद्गन्धं तर्जन्याश्च सदैव हि॥ तथैव मध्यमाङ्गुल्या गन्धं धार्यं स्वयं बुधैः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पित्रादि के आसन का मण्डल करे। पुनः सव्य होकर पूर्वमुख बैठ कर जल को लेकर दोनिया में जल भर कर उसमें दो आहुति दे। पुनः अपसव्य होकर जल, घृत सहित अन्न को लेकर दक्षिण तरफ कुश के ऊपर भूस्वामी के लिये रखे। पुनः सव्य होकर आहुति से बचा हुआ शेषान्न देवता के पात्र पर थोड़ा रखे। अपसव्य होकर

पुटकादिस्थितजले आहुतिद्वयं जुहुयात्॥ ॐ अग्नये कव्यवाहनाय स्वाहा॥ १॥ ॐ सोमाय पितृमते स्वाहा॥ २॥ अपसव्यम्॥ ततो जलघृतसहितं तिलव्यञ्जनयुतमन्नम्॥ ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः। इति दक्षिणतः कुशोपरि दद्यात्॥ सव्यम्॥ ततो हुतशेषमन्नं किञ्चित् देवपात्रद्वये दत्वा॥ अपसव्यम्। किञ्चित् किञ्चित् पित्रादिपात्रेषु दत्वा पिण्डार्थं किञ्चिदवशेषयेत्॥ ततः उत्कृष्टमन्नं सिद्धमामं वा पुरुषाहारक्षमं प्रत्येकं परिविष्यात्। सव्येन दैवे अपसव्येन पित्रादिपात्रेषु यथासम्भवमुपकरणं जलं घृतं चोपनीय॥ सव्यम्॥ देवान्नोपरि हस्तद्वयेन मधु दत्वा॥ ॐ मधु वाता ऽऋतायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोषधीः॥

थोड़ा-थोड़ा पित्रादि के पात्रों पर रख कर, पिण्ड के लिये थोड़ा अन्न बचा लेना। इसके बाद सिद्ध अन्न को पुरुष के तृप्तिपर्यन्त अन्न को प्रत्येक भोजनपात्र पर परोसे, सव्य से देवता के पात्र पर और अपसव्य से पित्रादि के पात्र पर परोसना चाहिये। सव्य होकर देवता के अन्न पर, अपसव्य होकर पितरों के अन्न पर दोनों हाथ से 'मधु वाता०' इस मन्त्र से मधु देना। सव्य से देवता के भोजनपात्र का स्पर्श करे। 'पृथ्वी ते पात्रं०',

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'इदं विष्णु०' इन दोनों को पढ़कर 'इदमन्नं०' इत्यादि से अन्न का स्पर्श कर 'यवोऽसि०' इस मन्त्र से अन्न के ऊपर
श्रा० यव छोड़कर हाथ में त्रिकुश, यव, जल लेकर 'ॐ अद्यामुक०' से अन्त का संकल्प करे। पुनः अपसव्य होकर दक्षिणा- सं०
१८१ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ-
ऽअस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ ॐ मधु मधु मध्वेति च जपेत् ॥ अपसव्येन पित्रा-
दिपात्रेषु मध्वन्नोपरि दत्त्वा मधु वातेति ॥ ततः सव्येन उत्तानपाणिभ्यां देवपात्रं स्पृष्ट्वा ॥ ॐ पृथिवी
ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे ऽअमृते ऽअमृतं जुहोमि स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा
निदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ इति पठित्वा ॥ ॐ कृष्ण हव्यमिदं रक्ष मदीयमिति
पठित्वा ॥ ॐ इदमन्नम् ॥ ॐ इमा आपः ॥ ॐ इदमाज्यम् ॥ ॐ इदं हविरिति पुनरन्ने दक्षिण-
कराङ्गुष्ठमावेश्य ॥ ॐ यवोऽसि यवयाऽस्मद्द्वेषो यवयारातीः ॥ इत्यन्नोपरि यवान् क्षिपेत् ॥ ॐ
अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनो विश्वे-
देवाः एतद्वोऽन्नं सोपकरणं नमः, इत्युत्सृजेत् ॥ एवमेव मातामहादिदेवेभ्योऽपि दद्यात् ॥ ततोऽप-
१६ सव्यम्। दक्षिणाभिमुखः पातितवामजानुः पितृपात्रं न्युब्जाभ्यां हस्ताभ्यां स्पृष्ट्वा। ॐपृथिवी ते १८१
पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे ऽअमृते ऽअमृतं जुहोमि स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा
भिमुख बाँये पैर को मोड़ उलटे हाथ से 'पृथिवी ते पात्रं०' 'इदं विष्णु०' इन दोनों मन्त्रों को पढ़ता हुआ अन्न का स्पर्श

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करे। पुनः दाहिने हाथ के अँगूठे से 'इदमन्नं०' इत्यादि का स्पर्श करे। 'अपहता०' इस मन्त्र से अन्न के ऊपर तिल छोड़कर हाथ में मोटक, तिल, जल लेकर अन्न का संकल्प करे। इसके बाद 'अन्नहीनं०' इसको पढ़कर

निर्दधे पदम्। समूढमस्य पाꣳसुरे स्वाहा॥ इति पठित्वा। ॐ कृष्ण कव्यमिदं रक्ष मदीयम्॥ ॐ इदमन्नम्। ॐ इमा आपः॥ ॐ इदमाज्यम्। ॐ इदं कव्यम्। पुनरन्ने दक्षिणकराङ्गुष्ठमावेइय॥ ॐ अपहता ऽअसुरा रक्षाꣳसि वेदिषदः। इत्यन्नोपरि तिलान् विकीर्य्य। मोटक-तिल-जलान्यदाय। अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धे एतदन्नं सोपकरणं ते स्वधा॥ एवमेव पितामहादिपञ्च-भ्योऽपि दद्यात् (वा एकतन्त्रेण सङ्कल्पः ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाम-मुकाऽमुकशर्मणां पार्वणश्राद्धे इदमन्नं सोपकरणं युष्मभ्यं स्वधा॥ एवं मातामहादिभ्योऽपि सङ्कल्पः कार्यः) यद्येकं पात्रं भवति तदा पृथिवी ते पात्रमिति मन्त्रः पुनर्न पठनीयः॥ ततः अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्॥ तत्सर्वमच्छिद्रमस्तु॥ इति जपेत्॥ ततः कुशेषूप-विश्य॥ ततो गायत्रीं त्रिर्जपेत्॥ मधु वाता ऽऋतायते मधु क्षरन्ति सिन्धवः॥ माद्ध्वीर्नः सन्त्वोषधीः॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँ ऽअस्तु सूर्यः। माद्ध्वीर्गावो भवन्तु नः॥ ॐ कृणुष्व पाजः

कुशे पर बैठकर ३ बार गायत्री का जप 'मधु वाता' 'कृणुष्वपाजः०' इत्यादि सूक्तों का पाठ तथा अप्रतिरथ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसितिन्न पृथ्वीं याहि राजेव वामवाँ२॥ ऽइभेन ॥ तृष्वीमनु प्रसितिन्द्रूणानोस्तासि विद्धि रक्षसस्तपिष्ठैः ॥१॥ तवं ब्भ्रमास ऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः ॥ तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वंगुल्काः ॥ २ ॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो ऽअस्या ऽअदब्धः ॥ यो नो दूरे ऽअघशंसो यो ऽअन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥३॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२॥ऽओषतात्तिग्महेते ॥ यो नो ऽअरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसन्न शुष्कम् ॥४॥ ऊर्द्ध्वो भव प्रतिविद्ध्याद्ध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ॥ अव स्थिरा तनुहि यातुजूनामुग्रमणीहि शत्रून् ॥५॥ भूमौ तिलान् विकीर्य्य ॥ ॐ उदीरतामवर ऽउत्परास ऽउन्मध्यमाः पितरः सोम्यासः ॥ असुँ य ऽईयुरवृका ऽऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ १ ॥ अङ्गिरसो नः पितरो नवग्वा ऽअथर्वाणो भृगवः सोम्यासः॥ तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥२॥ ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ॥ तेभिर्यमः संरराणो हवीꣳष्यु-शन्नुशद्भिः प्रतिकाममत्तु ॥३॥ त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनुनेषि पन्थाम् ॥ तव प्रणीती पितरो न ऽइन्द्रो देवेषु रत्नमभजन्त धीराः ॥ ४ ॥ त्वया हि नः पितरः सोम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वे कर्माणि चक्रुः पवमान धीराः ॥ वन्वन्नवातः परिधी२॥ रपोर्ण्णु वीरेभिरश्वैर्म्म घवा भवा नः ॥५॥ त्वꣳ सोम पितृभिः संविदानोनु द्यावापृथिवी ऽआततन्थ ॥ तस्मै त ऽइन्द्रो हुविषा विधेम वयꣳस्याम पतयो रयीणाम् ॥६॥ बर्हिषदः पितर ऽऊत्यर्व्वागिमा वो हव्या चकृमा जुषद्ध्वम् ॥ त ऽआगतावसा शन्तमेनाथा नः शं योरारपो दधात ॥ ७ ॥ आहम्पितृन्त्सुविदत्रा२॥ ऽअवित्सि नपातञ्च विक्रमणञ्च विष्णोः ॥ बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त ऽइहागमिष्ठाः ॥८॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ॥ त ऽआगमन्तु त ऽइह श्रुवन्त्वधिब्रुवन्तु तेऽवन्त्वस्मान् ॥९॥ आयन्तु नः पितरः सोम्यासो-ऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्न्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेऽवन्त्वस्मान् ॥१०॥ अग्निष्वात्ताः पितर ऽएह गच्छत सदः सदः सदत सुप्रणीतयः ॥ अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्व्ववीरन्दधातन ॥११॥ ये ऽअग्निष्वात्ता ये ऽअनग्निष्वात्ता मद्धये दिवः स्वधया मादयन्ते ॥ तेभ्यः स्वराडसुनीतिमेतां यथावशन्तन्वङ्कल्पयाति ॥१२॥ अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे॥सोम पीथं य ऽआशुः ॥ ते नो विप्रासः सुहवा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

का जप करे। उच्छिष्ट के पास, भूमि पर तीन कुशा बिछाकर त्रिकुश से प्रोक्षण करके तिल, जल मिला हुआ अन्न लेकर 'अनग्निदग्धा०' इसको पढ़ता हुआ उसी पर रख दे। इसके बाद सव्य होकर हरि का स्मरण करे,

भवन्तु व्रयꣳ स्याम पतयो रयीणाम् ॥१३॥ इति पितृमन्त्रान् ॥ सहस्रशीर्षेत्यादिपुरुषसूक्तं षोडशर्चं जपेत् ॥ ॐ आशुः शिशान इत्यादि द्वादशमन्त्रान् ॥ अप्रतिरथं जपेत् ॥ तत्र उच्छिष्टसन्निधावास्तृतकुशत्रयां भूमिं प्रोक्ष्य सर्वप्रकारमन्नमुद्धृत्य सतिलजलमेकीकृत्य ॥ अनग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु पराङ्गतिम् ॥ इति कुशोपरि विकिरेत्। ततः सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वा ॥ गायत्रीं ॥ मधुव्वाता इति ऋचं मधु मधु मध्विति च जपेत् ॥ ततोऽपसव्यम् ॥ पिण्डपातनार्थं निर्मितहस्तमात्रचतुरङ्गुलोच्छ्रितं दक्षिणप्लवं प्रादेशमात्रं वा तन्मध्ये हस्तद्वयेन दर्भपिञ्जल्यां रेखां कुर्यात् ॥ ॐ अपहताऽअसुरा रक्षाꣳसि वेदिषदः ॥ इति मन्त्रेण द्वयरेखां प्रादेशमात्रं

तीन बार गायत्री का जप करे। 'मधु व्वाता०' इसका पाठ करे। पुनः अपसव्य होकर एक हाथ चौड़ी चतुरस्र चार अंगुल ऊँची दक्षिण तरफ ढालुभाँ वेदी अथवा प्रादेशमात्र की बनाकर दोनों हाथ से कुशा लेकर 'अपहता०'

टि०-१ अनग्निदग्धेति पाठो यजुर्विदाम् सामगानान्तु अग्निदग्धेति पाठो युक्तः प्रदग्धेति। विजातीयानां तु अप्यदग्धेति पाठः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इस मन्त्र से प्रादेशमात्र रेखा करे। उस कुशे को ईशानकोण में फेंक दे। रेखा के ऊपर 'ये रूपाणि०' इस मंत्र
श्रा० से अंगार घुमावे। इस अंगार को दक्षिण तरफ रख दे। छिन्नमूल तीन कुशे को रेखा के ऊपर बिछावे। सव्य सं०
१८६ कुर्यात्॥ दर्भपिञ्जूलीमैशान्यां दिशि क्षिपेत्॥ ततः उभयत्र॥ ॐ ये रूपाणि प्रतिमुञ्चमाना
ऽअसुरा॑ सन्त॑ स्वधया॑ चरन्ति॥ परा॑ पुरो॑ निपुरो॑ ये भर॑न्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्,
इति मन्त्रेणाऽङ्गारं भ्रामयित्वा॥ अङ्गारं दक्षिणतो निदध्यात्॥ तत उपमूलसकृल्लूनदक्षिणा-
ग्रकुशत्रयं रेखायामास्तृणुयादुभयत्र॥ ततः सव्यं कृत्वा ॐ देवताभ्य इति त्रिर्जपेत्॥ ततो-
ऽपसव्यम्॥ पुटकषट्के जल-तिल-गन्ध-पुष्पाणि कृत्वा॥ एकं पात्रं वामहस्ते कृत्वा मोटक-तिल-
जलान्यादाय॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धपिण्डस्थानेऽवनेनिक्ष्व ते
स्वधा॥ इत्यास्तृतदर्भमूलेऽवनेजनं दद्यात्॥ एवं पितामहायाऽपरपात्रमादाय कुशमध्ये॥
तृतीयपात्रमादाय कुशाग्रे दद्यात्॥ एवमेवाऽपरस्थाने यथाक्रमं कुशेष्ववनेजनानि
मातामहादिभ्योऽपि दद्यात्॥ सव्यञ्जनतिल-मध्वाज्यहुतशेषान्नेन षट्पिण्डान्निर्माय
मधु-घृताभ्यामभिघार्य्य दद्यात्॥ मोटक-तिल-जल-पिण्डमादाय ॐ अद्यामुकगोत्र १८६

होकर 'देवताभ्यः०' इसका तीन बार जप करे। पुनः अपसव्य होकर छ दोनिया में जल, तिल, गन्ध, पुष्प छोड़
कर दाहिने हाथ में मोटकादि लेकर अवनेजन का संकल्प करके कुशे के मूल में जल छोड़े। सव्यञ्जन तिल, मधु,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घो तथा हुतशेषान्न मिलाकर छः पिण्ड बनाकर उसमें मधु, घृत लगाकर हाथ में मोटक, तिल, जल लेकर

'अद्य अमुकगोत्र०' इससे प्रथम पिण्ड अवनेजन के स्थान पर रखे इसी प्रकार शेष पाँचो पिण्डों को करे।

'लेपभाग०' इसको पढ़कर कुशे के मूल में हाथ पोंछकर सव्य हो पूर्वाभिमुख होकर दो आचमन कर हरि का
पितरमुकशर्मन् पार्वण- श्राद्धे एष ते पिण्डः स्वधा॥ इति प्रथमावनेजनस्थाने पिण्डं[2] दद्यात्॥ एवं पितामह-प्रपितामहयोः प्रत्येकं तत्तदवनेजनस्थाने पिण्डं दद्यात्॥ एवमेवापरस्थाने तत्तदवनेजनस्थाने मातामहादिभ्योऽपि पिण्डं दद्यात्॥ ततः प्रपितामहादूर्ध्वं त्रयाणां लेपभाग-भुजस्तृप्यन्तु, इति पठित्वा पित्रादिकपिण्डाधारकुशमूले करं प्रोक्ष्य सव्यं कृत्वा पूर्वाभिमुखो द्विराचामेत्॥ ततो हरिं स्मृत्वा॥ अपसव्यम्॥ दक्षिणाभिमुखः॥ अत्र पितरो मादयध्वं यथाभागमावृषायद्ध्वम्॥ इति पठित्वा वामावर्त्तनोदङ्मुखीभूय श्वासं नियम्य तेनैव परावर्तमानः पितॄन् ध्यायन्॥ अमी मदन्त पितरो यथाभागमावृषायिषत्॥ इति जपेत्॥ ततः अर्घदत्तावशिष्टजलयुतःप्रवनेजनपात्रमादाय॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्ध-
स्मरण करे। पुनः अपसव्य होकर 'अत्र पितरो०' इससे श्वांस खींचे, पितरों को ध्यान करता हुआ 'अमीमदन्त०'

से श्वांस छोड़े। पुनः अवनेजन पात्र को लेकर 'अद्य अमुकगोत्र' इससे प्रत्यवनेजन का संकल्प कर पिण्डे के ऊपर

टि०१- सर्वत्र युष्मद्शब्दमुच्चार्य; देयद्रव्योच्चारणम्, इति रुद्रधरः। टि०२- पिण्डदानं च सव्योपगृहीतदक्षिणहस्तेन कार्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दोनियां का जल छोड़ दे। नीबी के कुशे को निकाल कर सव्य होकर बाय हाथ से सूत्र लेकर दाहिने हाथ से 'नमो वः०'

इस मन्त्र को पढ़ता हुआ पिण्डे पर सूत्र चढ़ावे। दाहिने हाथ में मोटक, तिल, जल लेकर एक तन्त्र से सूत्रदान का

पिण्डेऽत्र प्रत्यवने निक्त्व ते स्वधा ॥ इति प्रथमपिण्डोपरि प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं विस्रंस्य[1] ॥ सव्यमाचम्य ॥ अपसव्यं कृत्वा ॥ वामेन पाणिनाऽऽनीय दक्षिणकरे सूत्रं कृत्वा ॥ ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्म ॥ इति पठित्वा ॥ एतद्वः पितरो वास इत्युक्त्वा षट्सु पिण्डेषु सूत्राणि धृत्वा ॥ मोटक-तिल-जलान्यादाय ॥ ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धपिण्डे एतत्ते वासः स्वधा ॥ एवमेव पितामहादिपञ्चभ्योऽपि दद्यात् (अथवा एक-तन्त्रेण सङ्कल्पः ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां तथा मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकशर्मणां पार्वणश्राद्धपिण्डेषु एतद्वासांसि युष्मभ्यं स्वधा ॥) इति सूत्रमुत्सृजेत् ॥ ततो गन्ध-पुष्प-धूप-दीप-ताम्बूलानि प्रत्येकं

संकल्प करे। इसके बाद प्रत्येक पिण्ड का गन्ध, पुष्प, धूप, दीप, ताम्बूल, दक्षिणा आदि से पूजन करे। 'ॐशिवा०'

टि०१— धौतवस्त्रस्य दशी विस्रंस्य ॥ इति नीवी ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इससे भोजनपात्र पर त्रिकुश से जल छोड़े। 'ॐ सौमनस्य' से फूल छोड़े 'अक्षतं०' इससे अक्षत भोजनपात्र पर छोड़े। पुनः मोटकादि लेकर अक्षय्योदक का संकल्प करे। पुनः सव्य होकर दक्षिण दिशा को देखता हुआ पिण्ड पिण्डेषु[1] दद्यात्॥ ततः ॐ शिवा आपः सन्तु॥ इति जलम्॥ ॐ सौमनस्यमस्य। इति पुष्पम्॥ ॐ अक्षतं चारिष्टं चास्तु। इत्यक्षतान् भोजनपात्रेषु क्षिपेत्। मोटक-तिल-जलान्यादाय। ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः पार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु[2]॥ इत्युत्सृजेत्॥ एवमेव पितामहादिपञ्चभ्योऽपि षष्ठ्यन्तनाम्ना प्रत्येकमुत्सृजेत्॥ ततः सव्यं कृत्वा दक्षिणां दिशं पश्यन् पिण्डोपरि॥ ॐ अघोराः पितरः सन्तु इति पठन् पूर्वाग्रां जलधारां दद्यात्॥ ततः कृताञ्जलिः प्राङ्मुखः आशिषः प्रार्थयेत्॥ ॐ गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्द्धन्तां वेदाः[3] सन्ततिरेव च॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्तु॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन॥ एताः सत्या आशिषः सन्तु॥

पर 'अघो०' इससे पूर्वाग्र जल धारा देना। 'गोत्रन्नो०' से पूर्वमुख बैठकर आशीर्वाद मांगे। पुनः अपसव्य होकर

टि० १— "दक्षिणाः सर्वभोगांश्च पेतिपिण्डे प्रदापयेत्" इति केचित्।

टि० २— 'अक्षय्याऽऽसनयोः षष्ठी द्वितीयाऽऽवाहने तथा॥ अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृता' इति शाखान्तरविषयम्, यजुर्विदां कात्यायनेन सर्वत्र सम्बोधनेन व्यवहृतत्वात् सर्वत्र सम्बोधनपदं देयम्।

टि० ३- वेदः सन्ततिरेव चेति पाठः यजुर्वेदीयानामेकवचनान्तः। अन्येषां तु बहुवचनान्तः पाठः सामगानामुक्तम् इति रुद्रधरः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पिण्ड पर पवित्री के सहित कुशों को रख कर 'ऊर्ज्ज०' इस से दक्षिणाग्र जलधारा, या दुग्ध की धारा देना। इसके बाद नम्र होकर पिण्डे को सूँघ-सूँघ कर उठावे, पिण्ड के नीचे का कुश और उल्मुक को अग्नि में छोड़े। सव्य होकर देव के अर्घ पात्र को हिलावे। अपसव्य होकर पित्रादि के पात्र को सीधा करे। सव्य होकर त्रिकुश, तदनन्तर पवित्री को उतार कर पितरों के पात्र में छोड़ देवे। इसके बाद पितरों के पात्र में जल, गन्ध, पुष्प, तिल, यव छोड़ कर पितरों के पात्र को हाथ में लेकर 'पितृभ्यः०' इस से पितरों को अर्घ देवे। इसके बाद पितरों के पात्र को सीधा रख कर देव के पात्र को हाथ में लेकर 'देवेभ्यः०' इस से देवों को अर्घ देवे। इसके बाद देव के पात्र को सीधा रख कर पित्रादि के पात्र को हाथ में लेकर 'पितृभ्यः०' इस से पित्रादि को अर्घ देवे। इसके बाद पित्रादि के पात्र को सीधा रख कर देव के पात्र को हाथ में लेकर 'देवेभ्यः०' इस से देवों को अर्घ देवे। इसके बाद देव के पात्र को सीधा रख कर पित्रादि के पात्र को हाथ में लेकर 'पितृभ्यः०' इस से पित्रादि को अर्घ देवे। इसके बाद पित्रादि के पात्र को सीधा रख कर देव के पात्र को हाथ में लेकर 'देवेभ्यः०' इस से देवों को अर्घ देवे।

मा० १९०

ततोऽपसव्यम्॥ पिण्डोपरि सपवित्रकुशानास्तीर्य ॐ ऊर्ज्जं व्वहन्तीरमृतङ्घृतं पयः कीलालं परिस्रुतम्॥ स्वधास्थ तर्प्पयत मे पितॄन्॥ इति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दुग्धधारां वा दद्यात्॥ ततः स्वस्थानस्थित एव सर्वान् पिण्डान्नम्रोभूयाऽऽघ्रायोत्थापयेत्॥ ततः पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत्॥ ततः सव्येन देवार्घपात्रद्वयं सञ्चाल्य॥ अपसव्येन पित्रार्घपात्राणि उत्तानीकृत्य॥ सव्येन कुशत्रययवजलानि दक्षिणाद्रव्यं चाऽऽदाय ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां पार्वणश्राद्धसम्बन्धिनां विश्वेषां देवानां कृतैतत् पार्वणश्राद्धप्रतिष्ठार्थं दक्षिणाद्रव्यं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे॥ एवं मातामहादिदेवेभ्योऽपि दद्यात्॥ ततोऽपसव्येन मोटक-तिल-जलान्यादाय पित्रादिश्राद्धदक्षिणां दद्यात्॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्पार्वण-

सं० १९०

यव, जल लेकर 'ॐ अद्यामुक०' से देवता के दक्षिणा का संकल्प करे। अपसव्य होकर पितरों की दक्षिणा का संकल्प करे। 'व्वाजे' इससे पितरों का विसर्जन करे। सव्य होकर 'विश्वेदेवाः०' से देव विसर्जन करे। 'देवताभ्यः०'

टि०१— हिरण्यरजतासम्पत्तौ यथासम्भवमन्यदपि फलमूलादिकं दक्षिणां च दद्यात्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

को तीन बार जपे । अपसव्य होकर दोनों हाथ से रक्षा दीप को बुझा दे । हाथ-पैर धोकर, सव्य होकर आच-
श्राद्धप्रतिष्ठार्थं दक्षिणाद्रव्यं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ एवं पितामहादिपञ्चभ्योऽपि श्राद्धदक्षिणां दद्यात् ॥ एकतन्त्रेण वा सङ्कल्पः ॥ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुकाऽमुकशर्मणां तथा मातामह-प्रमातामह-वृद्धप्रमातामहाना-ममुकाऽमुकशर्मणां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थं दक्षिणाद्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥ ॐ व्वाजे व्वाजेऽवत व्याजिनो नो धनेषु व्विप्रा ऽअमृता ऽऋतज्ञाः ॥ अस्य मदध्वं÷ पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ इति पित्रादीन् विर्जयेत् ॥ सव्यम् ॥ ॐ विश्वेदेवाः प्रीयन्ताम् ॥ इति देव-विसर्जनम् ॥ ॐ देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिपेर्जत् ॥ ततोऽपसव्यम् ॥ रक्षादीपं हस्ताभ्यां निर्वाप्य हस्तौ पादौ च प्रक्षाल्य ॥ सव्यमाचम्य ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति पठित्वा ॥ कर्मपूर्णतार्थं विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत्, अम्भसि वा क्षिपेत् ॥

इति अपात्रकपार्वणश्राद्धप्रयोगः समाप्तः ॥

मन कर 'प्रमादात्०' को पढ़े । कर्मपूर्णता के लिये विष्णु का स्मरण करे । श्राद्धीय वस्तु को ब्राह्मण को दे दे, अथवा जल में फेंक दे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुत्रादि हाथ में बाँस के दण्ड को लेकर नवीन मृत्तिका के घट में जल लाकर ग्राम के बाहर देवता के मन्दिर के पास या घर के दरवाजे पर अथवा पवित्र तीर पर पिण्डदान के लिये ईशानकोण में अग्नि जलाकर दो पसर चावल को जल से धोकर पिण्ड दान के लिये पाक बनावे। दक्षिण तरफ ढालू जमीन पर गोबर से लीपकर, अपसव्य

[अथ मातृदशगात्रारम्भः] तत्र पुत्रादिर्लगुडमादाय मृण्मयनूतनभाण्डेन जलमानीय ग्रामाद्बहिर्देवतायतने गृहद्वारि शुचितीरे वा पिण्डदानादैशान्यां दिशि अग्निं प्रज्वाल्य तण्डुल-प्रस्थतिद्वयं प्रक्षाल्य सुश्रृतं स्वयं पचेत्॥ ततो दक्षिणप्रवणे भूभागे गोमयोपलिप्ते गौरमृत्तिकया पिण्डार्थं दक्षिप्रवणस्थानं निर्माया चान्तः कृताऽपसव्यो दक्षिणाभिमुखः पातितवामजानुः पिण्ड-स्थानोपरि दक्षिणाग्रं कुशत्रयमास्तीर्य पुटकादौ जल-तिल-गन्ध-पुष्पाणि प्रक्षिप्य तत्पात्रं वामहस्ते कृत्वा मोटक तिल-जलान्यादाय॥अद्यामुकगोत्रे मातरमुकप्रेते शिरःपूरकप्रथमपिण्डस्थानेऽत्रावने निक्षेत्र मया दीयते तत्रोपतिष्ठताम्॥ इति कुशत्रयोपरि अवनेजनं दद्यात्॥ ततस्तिल-घृत मधुयुक्तं

होकर दक्षिाभिमुख हो बायाँ पैर मोड़कर पिण्ड स्थान पर दक्षिणाग्र तीन कुशे को बिछाकर दोनिये में गंध, पुष्प, तिल जल छोड़कर उसको बायें हाथ पर रखकर दहिने हाथ में मोटक, तिल, जल लेकर अवनेजन का संकल्प पढ़-कर कुशत्रय पर अवनेजन का जल छोड़े। तदनन्तर तिल, घृत, मधु युक्त दुग्धसिक्त जलता हुआ पिण्ड को लेकर हाथ में

Kirtikant Sharma Collection, Najafgarh